Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :10.16(2026); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:15, Issue:3(3), March 2026
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

# मृच्छकटिके प्रकरणलक्षणसमन्वयः

वै.बुज्जी ,संस्कृत उपनासिका
पि.आर्..प्रभुत्व कालाशाल(स्व ),काकिनाड
9550554154
bujjiyadla91@gmail.com

अथापरे संकृतरूपकवाङ्मये नैकविधानि रूपकोपरूपकाणि कवि प्रजापतिभिः सृष्टानि समुल्लसन्ति । लक्ष्यानुगुणं लक्षणसमन्वयःप्रदर्शनीयः इति शास्त्रपरम्परा प्रवर्तते । एवं सकलमपि शास्त्रजातं लक्ष्य -लक्षण समन्वयात्मकं भासते । एवं सुप्रसिद्ध लक्षणग्रन्धेषु निर्धिष्टलक्षणानुसारं शोधकार्याय स्वीकृतयो: मृच्छकटिक-मालतीमाधवप्रकरणयोः लक्षणसङ्गतिं सम्पादयितुमिह प्रयासः विधीर्यते । " वस्तु-नेता -रसस्तेषां भेदकः" । इति दशरूपकस्य सिद्धान्तानुसारं लक्ष्यकाव्यानि अर्थात् रूपकोपरूपकाणि परस्परं भिध्यन्ते ।

तत्र रूपकं तु दशधा विभक्तम् । तदुक्तम् -

" नाटकं सप्रकरणं भाणः प्रहसनम् डिमः ।
व्यायोग समवाकारौ वीथ्यङ्केहामृगा ॥ इति "

उपरूपकस्य अष्टादशभेदाः -

" नाटिका त्रोटकं गोष्ठी सट्टकं नाट्यरासकम् ।
प्रस्थानोल्लाप्यकाव्यानि प्रेङ्खणं रासकं तथा ॥
संलापकं श्रीगदितं शिल्पकञ्च विलासिका ।
दुर्मल्लिका प्रकरणी हल्लीशो भाणिकेति च ॥ "

मृच्छकटिकाख्येन स्वीयेन एकेनैव प्रकरण विशेषेण दिगन्तविश्रान्तकीर्तिरभवेत् शूद्रकमहाकवि:। अत्यन्तं लोकप्रियम् ,अपूर्वञ्च सामाजिकप्रकरणमिति कथने न कापि संशीतिः । साहित्यं तावत् सर्वदा समाजस्य दर्पणभूतं महीपते इत्यार्योक्तिं यथार्थयितुं शूद्रकमहाकविना सामाजिकेतिवृत्तं विचितमास्ते । इदं प्रथमतया नान्दीतः लक्षणसङ्गतिः प्रारभ्यते ।

नान्दी -

नन्दयति आनन्दयति सभ्यान् इति नान्दी ,
नन्दन्ति (रङ्गाधिष्ठानदेवताः ) अनया इति नान्दी ,
नन्दन्ति देवाः अस्यां प्रयुक्तायाम् इति नान्दी ।

इति व्याख्यातृभिः विविधप्रकारैः नान्दी पदस्य व्युत्पत्तिः प्रदर्शिता ।

**रङ्गस्थलाधिष्ठानदेवताः यस्याः प्रयोगेन नन्दन्ति ;सा नान्दीति समुदीर्यते ।**

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :10.16(2026); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:15, Issue:3(3), March 2026
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

अस्मिन्नवसरे भरतमुनेः वचनं स्मरणीयम् -

" पूर्वं कृता मया नान्दी आशीर्वचनसंयुता ।
अष्टाङ्गपदसंयुक्ता प्रशस्ता वेदसम्मता ॥ "इति ।

अपिच

सूत्रधारःपठेनान्दीं मध्यमं स्वरमाश्रित; ।
नान्दीपदैः द्वादशभि:अष्टाभिर्वाप्यलंकृता ॥
देव -द्विज -नृपादीनामाशीर्वादपरायणा ।
नन्दन्ति देवता यस्मात् सा नान्दीति संज्ञिता ॥

इति नान्ध्याः लक्षणं निर्दिष्टं भरतमुनिना ।

" नमोऽस्तु सर्वदेवेभ्यो द्विजातिभ्यस्तस्तोनमः।
जितं सोमेन वै राज्ञा शिवं गोब्राह्मणाय च ॥
ब्रह्मोत्तरं तथैवास्तु हता ब्रह्मद्विषस्तथा ।
प्रशास्त्विमां महाराजः पृथिवीञ्च ससागराम् ॥
राष्ट्रं प्रवर्धतां चैव रङ्गस्थाशा संमृद्धयतु ।
प्रोक्षाकर्तुर्महाधर्मो भवतु ब्रह्मभाषितः ॥
काव्यकर्तुर्यशश्चापि धर्मश्चापि प्रवर्धताम् ।
इज्ययाचानया नित्यं प्रीयन्तां देवता ॥ इति

नान्यः उदाहरणं प्रस्तुतं भरतमुनिना ।

किञ्च साहित्यदर्पणाकारःविश्वनाथकविराजः भरतस्य मतमेवम् उतटटङ्कयति -

आशीर्वचनसंयुक्ता स्तुतिर्यस्मात् प्रयुज्यते ।
देव -द्विज -नृपादीनां तस्मान्नान्दीति संज्ञिता ॥
माङ्गल्यशङ्खचक्राब्जकोककैरवशंसिनी ।
पदैर्युक्ता द्वादशभिरष्टभिर्वा पदैर्युक्ता ॥ इति

इदानीं शूद्रकमहाकविना मृच्छकटिकप्रकरणारम्भे प्रकटिता नान्दी परिशील्यते -

" पर्यङ्कग्रन्थिबन्धद्विगुणितभुजगाश्लेषसंवीतजानोः
अन्तः प्राणावरोधप्युपरतसकलज्ञानरुद्धेन्द्रियस्य
आत्मन्यात्मानमेव व्युपगतकरणं पश्यतस्तत्त्वदृष्ट्या
शम्भोर्वः पातु शून्येक्षणघटितलयब्रह्मलग्नः समाधिः ॥ इति

वीररसे समुपविश्य जानुद्वये सर्पं बध्वा प्राणायाम -
प्रक्रियया इन्द्रियगतं बाह्यज्ञानं निरुध्य,विषयव्यापाराञ्च परिहृत्य तत्त्वदृष्ट्या आत्मनि आत्मानं वीक्ष्यमाणस्य,ऐकाग्रयेण परब्रह्मणि लीनस्य परमशिवस्य निश्चलध्यानं युष्मान् अर्धात् अध्येतन्

,अध्यापकांश्च रक्षतु इति भावः ।

पातु वो नीलकण्ठस्य कण्ठःश्यामाम्बुदोपमः ।
गौरीभुजलता यत्र विध्युल्लेखेव राजते ॥ इति

परमेश्वरस्य कण्ठमाश्रयन्ती पार्वत्याः बाहुलता तटिल्लतेव भासमाना ,नीलमेघ इव प्रकाशमानः परमेश्वरस्य कण्ठः युष्मान् पठितृन् ,पाठकांश्च सर्वान् रक्षतु इति भावः । इहाशीर्वचनरूपा नान्दी शूद्रकमहाकविना संप्रयुक्ता विद्यते । चन्द्र- सूर्यादिपदानां निर्देशोऽत्र न दृश्यते इत्यतः इयं शोद्धानान्दीति व्यवह्नीयते । अपिचात्र अष्टपदनान्दी समुपनिबद्धा ।

एवं नान्दीलक्षणसमन्वयः सुसम्पन्नः । साम्प्रतं दशरूपके विनिर्दिष्टानि प्रकरण लक्षणानि प्रस्तूयन्ते -

अथ प्रकरणे वृत्तमुत्पाद्यं लोकसंश्रयम् ।
अमात्यविप्रवणिजामेकं कुर्याच्च नायकम् ॥
धीरप्रशान्तं सापायं धर्मकामार्थतत्परम् ।
शेषं नाटकवत् सन्धिप्रवेशकरसादिकम् ॥
नायिका तु द्विधा नेतुः कुलस्त्री गणिका तथा ।
क्वचिदेकैव कुलजा ,वेश्या क्वापि द्वयं काचित् ॥
कुलजाभ्यन्तरा ,बाह्या वेश्या ,नातिक्रमोऽनयः ।
आभिः प्रकरणं त्रेधा ,सङ्कीर्णं धूर्तसङ्कुलम् ॥ इति

वस्तु -नेता-रसस्तेषां भेदकः आदौ वस्तु इति दशरूपकगतसिद्धान्तः परिशील्यते- निरूप्यते -

" वस्तु च द्विधा " । इति

तत्राधिकारीकं मुख्यमङ्गं प्रासङ्गिकं विदुः । इति

इह ' वस्तु ' पदेन इतिवृत्तं बोध्यते । इतिवृत्तं तु रूपकस्य शरीरस्थानीयमिति भावयन्ति लाक्षणिकविचक्षणाः ।

प्रकृते मृच्छकटिकप्रकरणे नायकस्य चारुदत्तस्य सम्बन्धि इतिवृत्तम् आधिकारिकं वस्तु इति परिगण्यते । प्रकरणनायकः चारुदत्तस्तु परमदयालुः जन्मना धनाढ्योऽपि दया - दातृत्वादिगुणैः दारिद्र्येण समालिङ्गितः। नायिका वसन्तसेना तावत् भुवनैकसुन्दरी , ऐश्वर्यसम्पन्ना ,सद्गुणराशिश्च शोभते । विदूषकः मैत्रेयस्तु नायकस्य चारुदत्तस्य प्रियसखः ,सुखेषु दुःखेषु च नायकमाश्रित्यैव तिष्ठति । चारुदत्तस्य पत्नी तु धूता; धूता -चारुदत्तदम्पत्योस्तनूजः रोहसेनः । नायकस्य चारुदत्तस्य सुहृत् आर्यकनामकः नृपालः । प्रतिनायकपात्रधारी शकारः , अयं तु मूर्खः ,क्रूरः ,दुरात्मा,विलासपुरुषः ,आत्मानं पण्डितम्मन्यःबहुषु स्थलेषु परिहासाभाक् च भवति । किञ्चायं काणेलीमातृकः (व्यभिचारिण्याःपुत्रः)
उपरि निर्धिष्टाः पात्रविशेषाः आधिकारिकेतिवृत्तसम्बन्धिनः सन्दृश्यन्ते ।

अपि च द्यूतगृहपर्यवेक्षकः सभिकः ,संवाहक संज्ञकः बौद्धभिक्षुःशर्विलकः ,अयं

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :10.16(2026); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:15, Issue:3(3), March 2026
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

जात्या ब्राह्मणः ,आर्यकराज्ञः सचिवोत्तमः ,नायिकायाः वसन्तसेनायाः सखी मदनिका ,एतां नायिकासखीं शर्विलकः उद्वहति । किञ्च विट -चेटादिपात्रविशेषाः प्रासङ्गकेतिवृत्तसम्बन्धिनः सन्ति । एवं मृच्छकटिकप्रकरणे आधिकारिकप्रासङ्गिकेतिवृत्ते परस्परमाश्रिते विद्येते । आदितः अन्तं यावत् सचेतसां हृदयरञ्जके भवतः । वस्तुतः निर्देशात् परं नेतुः स्थानं निरूपयितुम् उपक्रम्यते ।

" भेदैश्चतुर्धा ललितशान्तोदात्तोद्धतैरयम् । "

इति नायकश्चतुर्विधः ,धीरललितः ,धीरशान्तः,धीरोदात्त,धीरोद्धतश्चेति ।

प्रकरणाख्ये रूपकभेदे तु धीराशान्तः नेता भवति । तल्लक्षणं च -

"सामान्यगुणयुक्तस्तु धीरशान्तो द्विजादिकः। इति ।

" विनयादिनेतृसामान्यगुणयोगी धीरशान्तः । द्विजादिक इति विप्र-वणिक्- सचिवादीनां प्रकरणनेतृणाम् उपलक्षणम् । विवक्षितं चैतत् । तेन नैश्चिन्त्यादिगुणासंभवेऽपि विप्रादीनां शान्ततैव, न लालित्यम् । यथा -मृच्छकटिकादौ चारुदत्तादिः । " इति वृत्तिवाक्यैः चारुदत्तः धीरशान्तः नायक इति निर्धारितः ।

" मरवशतपरिपूतं गोत्रमुद्भासितं यत् सदसि निबिडचैत्यब्रह्मघोषैःपुरस्तात् ।
मम निधनदशायां र्वतमानस्य पापै स्तदसदृशमनुष्यैर्घुष्यते घोषणापाम् ॥ "इति ।

यदा चारुदत्तः नायकः चाण्डालपुरुषैः वध्यस्थानां नीयमानः आशीत् तदा सः स्वपूर्वजानां महोन्नत्स्थितिं संस्मरण वर्तमानदीनस्थित्यैः नितरामनुशोचति । ततः परम् आर्यकनृपालेन संरक्षितः चारुदत्तः नायिकायाः वसन्तसेनायाः पाणिं गृह्णाति । किञ्च शृङ्गारावस्थाभिः नायकस्य पुनश्चातुर्विध्यं सन्दृश्यते । यथा -

" स दक्षिणः शठो धृष्टः पूर्वा प्रत्यन्यया हृतः । इति ।

एतद् विभागानुसारं चारुदत्ते दक्षिण -

नायकलक्षणं सङ्गच्छते । यथा -

दक्षिणोऽस्थां सहृदयः। इति ।

योऽसांज्येष्ठायां हृदयेन सह व्यवहरति ;

स दक्षिणः । यद्यपि चारुदत्ते वसन्तसेना नितरामासक्ता सन्दृश्यते ; तथापि स्वभार्यां धूतां न प्रत्याख्याति चारुदत्तः । तथा सहापि सहृदयस्सन् व्यवहरति इत्यतः चारुदत्तः दक्षिणः नायकः । चारुदत्तस्यानेन वचनेन अयमंशःस्पष्टो भवति । " हा !प्रेयसी !प्रेयसी विद्यमाने कोऽयं कठोरो व्यवसाय आसीत् । अम्भोजिनीलोचनमुद्राणां किं भानावनस्तं गमिते करोति ? ॥ " इति ।

" वस्तु-नेता-रसस्तेषां भेदकः । " इति करिकाभेदेन निर्दिष्ट नेतृपदेन नायकेन सह नायिका च ग्राह्या भवति । इह नायक सामान्यगुणयोगिनी नायिकेति व्यपदिश्यते ।

प्रकरणगतनायिकाविषये

"नायिका तु द्विधा नेतुः कुलस्त्री ,गणिका तथा ।

Cover Page
INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :10.16(2026); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:15, Issue:3(3), March 2026
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

क्वचिदेकैव कुलजा,वेश्या क्वापि ,द्वयं क्वचित् ॥
कुलजाभ्यन्तरा, बाह्या वेश्या नातिक्रमोऽन्यः ।
आभिः प्रकरणं त्रेधा ,सङ्कीर्णं धूर्तसङ्कलम् ॥ "
इति दशरूपककृदा निर्दिश्यते ।
" स्वान्या साधारणस्त्रीति तद्गुणा नायिका त्रिधा । "
इत्यादौ नायिकायाः त्रैविध्यम् - स्वीया नायिका ,परस्त्री अर्थात् परकीया नायिका , साधारणस्त्रीचेति ।
प्रस्तुते मृच्छकटिकाख्ये प्रकरणे नायकस्य चारुदत्तस्य पत्नी धूता तु स्वकीया नायिका कुलस्त्री कोटावन्तर्भवति ।
इदानीं वसन्तसेना कीदृशी नायिकेति विचार्यते -
दशरूपके नायिकाभेदः -
अथान्यस्त्री -
"अन्यस्त्री कन्यकोढा च नान्योढाऽङ्गिरसे क्वचित् ।
कन्यानुरागमिच्छातः कुर्यादङ्गाङ्गीसंश्रयम् ॥ "इति ।
वसन्तसेना तु परकीया कन्यका नायिकागणे अन्तर्भवति ।
कन्यका तु पित्राद्यायत्वात् अपरिणीतापि अन्यस्त्रीति परिगण्यते । किञ्च
"साधारणस्त्री गणिका कलाप्रागल्भ्यधौर्त्ययुक् । इति
यथा मृच्छकटिकायां वसन्तसेना चारुदत्ते नायके बहुधा अनुरक्तेति समुपवर्ण्यते ।
" आदौ वाच्यः स्त्रिया रागः ,पुंसः पश्चात्तदिङ्गितैः। "
इत्यालङ्कारिकवचनानुसारं मृच्छकटिकप्रकारणस्य प्रथमाङ्के एव वसन्तसेना नायिकायाः चारुदत्त विषयकः प्रणयः समुपवर्णितः । प्रकरणान्ते अर्थात् दशमाङ्के नृपालकः आर्यकः चारुदत्त - वसन्तसेनयोः विवाहं कारयति । तदानींतन समाजे वेश्यासु भेदद्वयं दृश्यते स्म । गणिकाः वेश्याश्चेति । गणिकास्तु सङ्गीतनाट्यादिललितकलासु प्रवीणा:आसन् । गणिकाः राजनर्तकीस्थानमलङ्कुर्वन्तिस्म । समाजे गणिकाः आदरभाजनान्यासन् स्वकलानैपुण्यप्रदर्शनेन । गणिका वसन्तसेना तावत् सौशील्यवती ,ऐश्वर्यवती चासीत् । एवं दान -दयावीरं चारुदत्तं कामयामाना वसन्तसेना प्रकरणान्ते नायकस्य चारुदत्तस्य पाणिं गृहीत्वा गृहस्ताश्रमे प्रविश्य आदर्शजीवनं यापयितुम् उध्यताऽभूत् । एवं प्रकरणान्ते नायिका -नायकयोः वसन्तसेना - चारुदत्तयोः आह्लादमयसमागमः प्रदर्शितः महाकविना शूद्रकेन । किञ्च प्रकरणमेतत् सङ्कीर्णं रूपकमिति निर्णीतं दशरूपके उभयविधयोः नायिकयोः अर्थात् कुलजा गणिकानायिकयोः सत्त्वात् ।
" वस्तु - नेता -रसस्तेषां भेदकः "।
इत्यत्र तृतीयः अन्तिमांशश्च रसः ।

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :10.16(2026); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:15, Issue:3(3), March 2026
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

प्रकरणान्ते रूपकविशेषे तु

" एको रसोऽङ्गी कर्तव्यो वीरः शृङ्गार एव वा ।
अङ्गमन्ये रसाः सर्वे कुर्यान्निर्वहणेऽद्भुतम् ॥ "

इति वीर - शृङ्गारयोर्मध्ये एकः अङ्गिरसत्वेन निबन्धनीय इति सिद्धान्तविशेषः ।

मम्मटाचार्येण शृङ्गाररसस्य भेदद्वयम् एवं निर्दिष्टम्-

" तत्र श्रृङ्गारस्य द्वौ भेदौ सम्भोगो ,विप्रलम्भश्च । तत्राद्यः परस्परावलोकनालिङ्गनाधरपानपरिचुम्बनाद्यनन्तत्वादपरिच्छेद्य एक एव गण्यते । ..आपत्सु अभिलाषविरहेर्ष्याप्रवास शापहेतुक इति पञ्चविध :। " इतिवृत्तिवाक्यम् ।

प्रकृते मृच्छकटिकाख्ये प्रकरणे नायकस्य चारुदत्तस्य आदर्शगुणैः नायिका वसन्तसेना नितराम् अनुरक्ता सती तमेव कामयते । तदुक्तम् -

" अवन्तिपुर्यां द्विजसार्थवाहो युवा दरिद्रः किल चारुदत्तः ।
गुणानुरक्ता गणिका च यस्य वसन्तशोभेव वसन्तसेना ॥ " इति ।

उपरि निर्दिष्टप्रस्तावनया अभिलाषहेतुक:विप्रलम्बश्रृङ्गारःअभिव्यज्यते । 'अभिलाषः' इत्युक्तौ इदं प्रथमतया दर्शनमात्रेण ,गुणगणश्रवणमात्रेण वा हृदि प्रादुर्भूतः अनुरागविशेषः।

"आदौ वाच्य: स्त्रियारागः ,पुंसः पश्चात्तदिङ्गितैः । "

इत्यालङ्कारिकनियमानुसारं नायकविषयकः नायिकायाः अनुरागातिशयःआदौ समुपवर्णितः । प्रथमाङ्के नायिकायाः अनुरागस्य अङ्कुरावस्था सम्यक् तयोपवर्णिता । तदनन्तराङ्केषु नायिकानुरागः पल्लवितः ,कोरकितः ,पुष्पितश्चसन् अन्तिमेऽङ्के अर्थात् दशमाङ्के फलावस्थां गतः इति प्रकरणे शृङ्गाररसः अङ्गिरसत्वेन समुपनिबद्धः ।

उपयुक्तग्रन्थ सूची -

शूद्रकः - मृच्छकटिकप्रकरणम्
धनज्जयः- दशरूपकम्
विशनाथः - साहित्यदर्पणम्
भरतः - नाट्यशास्त्रम्
मम्मटाचार्यः - काव्यप्रकाशः